विधूतिः, स्त्री, कम्पनम् । विपूर्व्वधूधातोः क्तिप्रत्ययेन निष्पन्नमिति ॥

विधूननं, क्ली, (वि + धू + णिच् + ल्युट् । नुक् च ।) कम्पनम् । तत्पर्य्यायः । विधुवनम् २ । इत्यमरः । ३ । २ । ४ ॥ विधुननम् ३ । इति शब्दरत्नावली ॥ ( यथा, साहित्यदर्पणे । ३ । १४२ ।
"केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् ।
प्राहुः कुट्टमितं नाम शिरःकरविधूननम् ॥")

विधूनितं, त्रि, कम्पितम् । विपूर्व्वण्यन्तधूधातोः क्तप्रत्ययेन निष्पन्नम् ॥

विधृतं, क्ली, विशेषेण धृतम् । यथा,—
"अथावकृष्य विन्यस्तं लोष्टकाष्ठतृणादिना ।
उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः ॥"
इत्याह्निकतत्त्वम् ॥

विधेयः, त्रि, विधातुं शक्यः । (वि + धा + "अचो यत् ।" ३।१।९७। इति यत् । "ईद्यति ।" ६।४।६५ । इति आत ईत् ।) वाक्यस्थः । तत्पर्य्यायः । विनयग्राही २ वचनेस्थितः ३ आश्रवः ४ । इत्यमरः ॥ ( यथा, महाभारते । ५ । २३ । १३ ।
"कर्णोऽमात्यः कुशली तात कच्चित्
सुयोधनो यस्य मन्दो विधेयः ॥")
विधिजन्यबोधविषयः । यथा,—
"अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥"
इत्येकादशीतत्त्वम् ॥
अपि च । प्रमाणान्तरासन्निहितं कर्म्म प्रथमं बुद्धौ न विषयीभवति शब्दादेव तस्य कर्म्मण उपस्थितिरित्युपादेये विधेये कर्म्मणि पूजादौ शुचितत्कालजीविनः कर्म्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः । इति तिथ्यादितत्त्वम् ॥ ( कर्त्तव्यम् । यथा, बृहत्संहितायाम् । ९५ । ४९ ।
"द्वात्रिंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम् ।
तत्तथा विधेयं गुणदोषफलं वियासूनाम् ॥"*॥
अधीनः । यथा, रघुः । १९ । ४ ।
"सन्निवेश्य सचिवेष्वतः परं
स्त्रीविधेयनवयौवनोऽभवत् ॥"
तथा च तत्रैव । ७ । ६२ ।
"तस्मौ भ्वजस्तम्भनिषण्णदेहं
निद्राविधेयं नरदेवसैन्यम् ॥" )

विधेयता, स्त्री, (विधेयस्य भावः । विधेय + तल् ।) विधेयत्वम् । विधिजन्यबोधविषयत्वम् । यथा । यथा ब्रह्मवधादिषु पापस्य निषिद्धतयोपयुक्तब्राह्मणादिस्थाने द्वैगुण्यं तथा गङ्गास्नानादिषु पुण्यस्य विधेयतावच्छेदकगङ्गादिस्थाने द्वैगुण्यम् । इति प्रायश्चित्ततत्त्वम् ॥ ( अधीनता । यथा, किराते । ११ । ३३ ।
"परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥" )

विध्वंसः, पुं, ( वि + ध्वंस + घञ् । ) विनाशः । यथा, तिथ्यादितत्त्वे ।
"हरिते रोगोऽनुतापः शस्यानामीतिभिश्च विध्वंसः ।
कपिले शीत्रगसत्त्वैस्तद्ध्वंसोऽथ दुर्भिक्षम् ॥"
( अपकारः । यथा, किराते । २ । १६ ।
"विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥" )

विनतः, त्रि, ( वि + नम + क्तः । ) प्रणतः । (यथा, आर्य्यासप्तशत्याम् । ६१६ ।
"सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि ।
खल इव दुर्लक्ष्यस्तव विनतमुखस्योपरि स्थितः कोपः ॥")
भुग्नः । ( यथा, बृहत्संहितायाम् । ६१ । ३ ।
"दशसप्तचतुर्द्दन्त्यः प्रलम्बमुष्कानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥")
शिञ्चितः । इति मेदिनी । ते, १५६ ॥ ( सङ्कुचितः । यथा, रामायणे । १ । ४३ । २४ ।
"विनतं क्वचिदुद्भूतं क्वचिद्याति शनैः शनैः ।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥"
पुं, स्वनामख्यातवानरविशेषः । यथा, भट्टिः । ७ । ५२ ।
"प्राचीं तावद्गिरयग्रः कपिभिर्विनतो ययौ ।
अप्रग्राहैरिवादित्यो वाजिभिर्दूरपातिभिः ॥")

विनता, स्त्री, गरुड़माता । ( सा तु दक्षप्रजापतेः कन्या । यथा, महाभारते । १ । ६५ । १२ ।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ।
कद्रुश्च मनुजव्याघ्र दक्षकन्यैव भारत ॥")
पिड़काभेदः । इति मेदिनी । ते, १५६ ॥ ( यथा, सुश्रुते । २ । ६ ।
"महती पिड़का नीला पिड़का विनता स्मृता ॥")

विनतासूनुः, पुं, ( विनतायाः सूनुः पुत्त्रः । ) अरुणः । इति हेमचन्द्रः ॥ गरुड़श्च ॥

विनदः, पुं, ( विशेषेण नदति शब्दायते पत्रफलादिनेति । नद् + अच् । ) विन्याकवृक्षः । इति शब्दचन्द्रिका ॥ छातियान् इति ख्यातः ॥

विनम्रकं, क्ली, तगरपुष्पम् । इति राजनिर्घण्टः ॥

विनयः, त्रि, वणिक् । क्षिप्तः । निभृतः । विजितेन्द्रियः । इत्यजयपालः ॥ ( विशेषेण नयतीति । नी + अच् । विशेषेण प्रापकः । पृथक्कर्त्ता । यथा, ऋग्वेदे । २ । २४ । ९ ।
"स संनयः स विनयः पुरोहितः
ससुष्टुतः सयुधि ब्रह्मणस्पतिः ॥"
"विनयः संगतानां विविधं नेता पृथक्कर्त्ता स एव ।" इति तद्भाष्ये सायणः ॥)

विनयः, पुं, ( वि + नी + अच् । ) शिक्षा । (यथा, रघुः । १ । २४ ।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥")
प्रणतिः । इति मेदिनी । ये, १०५ ॥*॥ (यथा,
"जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"
इत्युद्भटः ॥ )
अथ विनयप्रशंसा ।
"वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यो हि शिक्षेत् विनयं विनीतात्मा हि नित्यशः ॥
समग्रां वशगां कुर्य्यात् पृथिवीं नात्र संशयः ।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥"
इति मत्स्यपुराणे १८९ अध्यायः ॥*॥
( विशिष्टो नयः । ) दण्डः । यथा । "यत्तु ।
'पूर्व्वमाचारयेद्यस्तु नियतं स्यात् स दोषभाक् ।
पश्चाद्यः सोऽप्यसत्कारी पूर्व्वे तु विनयो गुरुः ॥'
इति नारदवचनम् ॥
तत्पूर्व्वापत्तया परस्याधिकवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम् । युगपत्संप्रवर्त्तने अधिकदण्डाभावमाह स एव ।
'पारुष्ये साहसे चैव युगपत्संवर्त्तयोः ।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः ॥'
विनयो दण्डः ।" इति व्यवहारतत्त्वम् ॥

विनयग्राही, [न्] त्रि, ( विनयं गृह्णातीति । ग्रह + णिनिः । ) वचनेस्थितः । इत्यमरः ॥

विनयस्थः, त्रि, (विनये तिष्ठतीति । स्था + कः ।) आज्ञाकारी । तत्पर्य्यायः । विधेयः २ आश्रवः ३ वचनस्थितः ४ वश्यः ५ प्रणेयः ६ । इति हेमचन्द्रः । ३ । ९६ ॥

विनया, स्त्री, वाट्यालकः । इति मेदिनी ॥

विनशनं, क्ली, ( विनश्यति अन्तर्दधाति सरस्वत्यत्रेति । वि + नश + अधिकरणे ल्युट् । ) कुरुक्षेत्रम् । तत्र हस्तिनाया उत्तरपश्चिमे वर्त्तते । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ८२ । १०५ ।
"ततो विनशनं गच्छेन्नियतो नियताशनः ।
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती ॥"
वि + नश + भावे ल्युट् । ) विनाशश्च ॥

विनष्टः, त्रि, ( वि + नश + क्तः । ) नाशाश्रयः । ध्वंसविशिष्टः । यथा । शिखी विनष्टः पुरुषो न नष्टः । इति विशेषव्याप्तिटीकायां मथुरानाथः ॥ पतितः । यथा नारदः ।
"विनष्टे वाप्यशरणे पितर्य्युपरतस्पृहे ॥"
विनष्टे पतिते । इति दायभागः ॥

विनष्टिः, स्त्री, विनाशः । इति विपूर्व्वनशधातोर्भावे क्तिप्रत्ययेन निष्पन्नमिति । इति सिद्धान्तकौमुदी ॥ (यथा, भागवते ३ । १ । २० ।
"तत्राथ शुश्राव सुहृद्विनष्टिं
वनं यथा वेणुजवह्निसंश्रयम् ।